॥ अथ प्रवेश पाठावलिः ॥

A First Reader of Sanskrit

BY

Y. MAHALINGA SASTRI, M. A., B. L.,

B. G. PAUL & Co,
MADRAS.

Books by Mahalinga Sastri

श्रृणुत विबुधवर्याः प्रार्थनामस्मदीयां
कतिकतिविधया वः क्षीयते नार्जितं स्वम् ।
सरभसपरिचर्यापात्रमत्राद्रियध्वं
प्रतिनवकविकर्म स्वर्गवीपाशुपाल्यम् ॥

		Rs.	A
1.	लघुरामचरितम्—2nd Edition	0	8
2.	प्रवेशपाठावलिः पूर्वभागः—in press		
3.	प्रवेशपाठावलिः उत्तरभागः ...	0	10
4.	उपक्रमपाठावलिः— ...	0	10
5.	मध्यमपाठावलिः— ...	0	12
6.	प्रौढपाठावलिः—	0	12
7.	संस्कृतलाघवम्—A simple grammar of Sanskrit for High School use (will be shortly published)		
8.	भासकथासारः—Tales from Bhasa. with a Foreword by *Prof. A. B. Keith, Edinburgh* .... Several times an Intermediate Prose Text in South Indian Universities.	2	0

॥ अथ प्रवेश पाठावलिः ॥

A FIRST READER OF SANSKRIT

BY

Y. MAHALINGA SASTRI M. A., B. L.,

AUTHOR OF

BHASAKATHASARA, KINKINIMALA, PRATI-RAJASUYAM, UBHAYARUPAKAM, SRINGARA NARADIYAM, ADIKAVYODAYAM ETC, ETC.

B. G. PAUL & Co.,
EDUCATIONAL PUBLISHERS,
4, FRANCIS JOSEPH ST., G. T. MADRAS.

PRICE As. 10

FIRST EDITION. DECEMBER 1947.
1500 COPIES

GNANASAMBANDAM PRESS,
DHARMAPURAM.
PAPER SUPPLIED BY PARTY.

PREFACE.

In this First Reader the lessons are all entirely new. Of the first series of twelve stories, the majority can be traced to the *Aesops Fables*. No, VI is adapted from the *Katha Sarit Sagara* and there are a few others of popular origin. The second series of twelve stories has for its source the *Pancha Tantra*. In between the two series have been interposed several sections of memorable thought and charming recollections from great poets, divested of their metrical form. Sarga XVIII of the Ramayana Ayodhyakanda is added towards the end, that being deemed sufficient poetry for the pupil in his second year of Sanskrit studentship. A song poem concludes the book.

A Primer of Sanskrit and a High School Grammar, yet to be published, will complete my scheme of text books to cover the whole course of Sanskrit instruction in High Schools.

My thanks are due to Dr. P. S. Subrahmanya Sastri M.A., PH.D. for his very prompt and kind response to my request for a Foreword.

Let me hope that the times will be propitious and sympathy will not be lacking to encourage my endeavour in this line.

Tiruvalangadu,
4th Dec. 1947.

Y. Mahalinga Sastri.

Vidyaratna
P. S. Subrahmanya Sastri,
M. A., PH.D.
Retired Professor of Sanskrit,
Annamalai University.

Trivadi.
21—1—48.

Foreword.

Mr. Y. Mahalinga Sastri, the author of the **Pravesa-Pathavali,** is well known to the student world. This contains stories from varied sources and also the 18th Sarga of the Ayodhya Kanda of the Valmiki Ramayana. The matter and method are made suited to the standard. I wish that young boys and girls benefit themselves through the study of this book and make this attempt of the author an unqualified success.

P. S. Subrahmanya Sastri.

॥ श्रीः ॥

॥ प्रवेश पाठावलिः ॥

पाठसूची

॥ श्रीः ॥

॥ अथ प्रवेश पाठावलिः ॥

॥ उत्तर भागः ॥

पाठः I

॥ अन्धस्य प्रदीपग्रहणम् ॥

कश्चित् अन्धः रात्रौ विपणिमार्गेण अगच्छत् । सः दक्षिणहस्ते दण्डम् अधारयत् । वामहस्तेन च प्रदीपम् अवहत् । तस्य पुरः कश्चित् कुमारः समागात् । कुमारः अन्धं दृष्ट्वा विहस्य अपृच्छत् । "कस्मात् त्वम् अन्धः सन् दीपं वहसि । किम् अनेन ते प्रयोजनम्" इति ॥

अन्धः प्राह—"भद्र, सत्यं न मे दीपेन प्रयोजनम् तथापि, रात्रौ दीपेन मां पश्यन् अन्यः कोऽपि मयि न निपतिष्यति । तस्मात् मया धृतो दीपः ।" इति ॥ कुमारः तद्वचनं श्रुत्वा लज्जितः तूष्णीं गतः ॥

वृद्धान्नोपहसेत् ॥

पाठः II.

॥ अनृतवादी बालः ॥

कश्चित् बालः कान्तारे अजवृन्दम् अचारयत् । तस्य बान्धवाः अदूरे क्षेत्रं कर्षन्तः आसन् । बालस्य क्रीडार्थम् अनृते रुचिः अजायत । तेन असौ मिथ्यैव "व्याघ्रो व्याघ्रः" इति अक्रोशत् ।

ततः संभ्रान्ताः तस्य बान्धवाः तस्य रक्षार्थं लगुडान् आदाय समापतन् । बालः तान् वञ्चयित्वा अहसत् । अथ पुनः एकवारं सः एवमेव तान् अवञ्चयत् ।

अनन्तरं सत्यमेव व्याघ्रः उपस्थितः । स च बालः भयात् भृशं बान्धवान् पर्यक्रोशत् ।

तस्य तु आक्रोशान् श्रुत्वापि ते बान्धवाः "मिथ्यैव पुनः अयं क्रोशति इति मत्वा उपैक्षन्त ।

व्याघ्रः बालं व्यापाद्य गृहीत्वा पलायत ॥

अनृतभाषिणं स्वजनः अपि न प्रमाणीकरोति ॥

पाठः III

॥ अजशिशोः वृकस्य च ॥

कश्चित् अजशिशुः नद्यां जलं पिबन् आसीत्। तत्र कोऽपि वृकः आगच्छत्। स अजशिशुं दृष्ट्वा अचिन्तयत्—"एनं भक्षयिष्यामि" इति, आह च सक्रोधम् "रे धूर्त! किं मम पानार्हं जलं मुखेन दूषयसि?" इति। भीतः अजशिशुः सविनयम् अब्रवीत् "स्वामिन्। त्वत्सकाशादेव जलं मत्समीपे प्रवहति। तत् किमेवं ब्रवीषि।" इति॥

ततः वृकः सामर्षम् अवोचत् "अरे, वाचाट! षण्मासेभ्यः पूर्वं त्वं किल मम निन्दाम् अकरोः" इति। अजशिशुः सविषादं प्रत्यवादीत् "जातस्य मे चत्वारो मासाः न पूर्णाः। तत् कथम् इदं स्यात्" इति।

वृकः महान्तं कोपं कृत्वा, "यदि न त्वं माम् अनिन्दः तव पिता मे दूषणम् अकरोत्। सर्वथा ममासि वध्यः" इति शंसन् अभिपत्य अजशिशुं गले गृहीत्वा निनाय॥

निरपराधिनोऽपि दुर्जनानां गोचरे पतिताः
साधवः न क्षेमेण निर्गच्छन्ति॥

पाठः IV

॥ मण्डूकवैद्यः ॥

कश्चन मण्डूकः तडाकस्य तीरे स्थित्वा शब्दम् अकरोत्—"भो भोः पक्षिणः मृगाः मत्स्याः, सर्वे यूयम् आगच्छत" इति । तत्र केचन मृगाः खगाश्च सकौतुकं तस्य समीपं समागच्छन् ॥

अथ मण्डूकः सगर्वं दक्षिणचरणमुत्क्षिप्य तेषां स्वागतं विधाय अब्रवीत्—"भोः सुहृदः, जानीत । महावैद्यः खलु अहमस्मि । कस्य का वा रोग-चिकित्सा कर्तव्या । क्षिप्रं मे ब्रूत" इति ॥

केचन प्राणिनः विस्मिताः तस्य वाचि श्रद्धाम् अकुर्वन् । इतरे साशंकाः तत्र अवज्ञाम् अकुर्वन् । अथ कश्चित् शृगालः तम् उपेत्य प्राह—"भ्रातः, सत्यं भिषगसि । कुतः तर्हि न ते स्थगु त्वया चिकित्सितम् । आदौ स्वस्य भिषग् भूत्वा ततः परेषां चिकित्सकः भवितुम् अर्हसि" इति ॥

शृगालस्य वचः श्रुत्वा सर्वे खगमृगाः अहसन् ।

मण्डूको लज्जितः सलिलं प्राविशत् ॥

स्वदोषमज्ञात्वा परशिक्षणाय प्रवृत्तः परिभवम् आप्नुयात् ॥

पाठः V

॥ दर्पणचन्द्रः ॥

बालस्य रामस्य कौसल्या चन्द्रम् अदर्शयत् । रामः प्रीत्या चन्द्रं ग्रहीतुम् ऐच्छत् । तं च दूरगतं दृष्ट्वा, "चन्द्रं मम हस्ते स्थापय" इति मातरं निरबध्नात् । कौसल्या अब्रवीत् "जात, न शक्यं चन्द्रं ग्रहीतुम् । अन्यत् ते प्रियं वस्तु ददामि" इति ॥

रामः न अन्यत् किंचित् ऐच्छत् । मात्रा दत्तं पुत्रिकादिकं नाददे । नाभुंक्त फलानि भक्ष्याणि वा । किंतु "प्रयच्छ मे गृहीत्वा चन्द्रम्" इति केवलं रुदन् कौसल्याम् अक्लेशयत् । पिताऽपि दशरथः तं सर्वोपायैः प्रीणयितुं नाशक्नोत् ॥

रामः चिररुदितेन भृशं ग्लानोऽभवत् । ततः मन्त्री सुमन्त्रः दर्पणम् आनाय्य रामस्य हस्ते दत्वा तस्मिन् चन्द्रबिम्बम् अदर्शयत् । रामोऽपि चन्द्रं हस्तगतं दृष्ट्वा प्रीतोऽभवत् ॥

दुःसाधमपि कार्यं युक्त्या समादधते बुद्धिमन्तः ॥

पाठः VI

।। क्रोधिनः पुरुषस्य ।।

कश्चित् पुरुषः स्वस्य सुहृदं द्रष्टुं गतः । स च सुहृत् स्वगृहे केनचित् अन्येन स्वैरम् आलापं कुर्वन् आस्त । पुरुषः बहिरलिन्दे स्थितः तमलापमश्रृणोत् । सुहृत् प्रकृतपुरुषस्य गुणान् प्रशशंस ।

अन्यः प्राह—"बाढं स गुणवान् । तथापि द्वौ तस्य दोषौ स्तः । येन असौ साहसिकः क्रोधनश्च" इति ॥

बहिःस्थितः पुरुषः एतत् श्रुत्वा क्रोधेन ज्वलन् सहसा अन्तः प्रविश्य प्रतिवक्तारं गले जग्राह । जगर्ज च— "रे जाल्म, किं मे साहसम् । को मे क्रोधः । कुत्र त्वया ज्ञातम् । कदा वा ।" इति ॥

अनेनास्य महता संरंभेण तदा तत्र मिलिताः जनाः हसन्तः ऊचुः "भद्र, इदानीमत्रैव किल स्पष्टम् साहसं क्रोधश्च, उभयमपि । तत् मुच्यतामयं सत्य-वादी" इति ॥

एवं जनैः उपहसितः स क्रोधी स्वदोषेण लज्जितः निववृते ॥

सर्वः स्वदोषं न जानाति ॥

पाठः VII

॥ वृद्धः मृत्युश्च ॥

कश्चित् वृद्धः वनान्तरे काष्ठानि छित्वा वहन् मार्गे उग्रातपेन श्रान्तः वृक्षमूले निषीदति स्म । चिरेणापि सः पुनः उत्थाय काष्ठभारं वोढुं नाशक्नोत् ।

सुदूरे अभवत् तस्य गृहम् । तस्य क्षुत् पिपासा च अवर्धेताम् । तस्य अङ्गनि विवशानि व्यपीदन् । मोहो मतिमलंघयत् । सः क्लेशमसहमानः व्यलपत्—"भो, मृत्यो, कस्मात् न मां नयसि । कियत् आयुः मे वर्धते । कियन्तं कालं मया दुःखम् अनुभवितव्यम्" इति ॥

तदानीं तस्य पुरः सहसा मृत्युः आविरभूत् । मृत्युरब्रवीत्—"अये, वृद्ध, त्वया समाहूतः मृत्युरहम् उपस्थितः । किं ते मया कार्यं, ब्रूहि" इति ॥

मृत्युं दृष्ट्वा भीतः वृद्धः अवदत्—"भोः यदि ते मयि करुणा इमं भारं मम शिरसि आरोपय । एतदर्थमेव त्वाम् अहं स्मृतवानस्मि" इति ॥

मृत्युः हसन् तथैव कृत्वा अन्तरधात्" ॥

सर्वः क्लिष्टोऽपि मर्तुं नेहते ॥

पाठः VIII

॥ छिन्नवालः शृगालः ॥

कश्चित् शृगालः कुत्रचित् ग्रामे रात्रौ चौर्यहेतोः पर्यटन् कस्यचित् कर्मकारस्य गृहं प्राविशत् ।

तत्र सः रहः स्थापिते कूटयन्त्रे दुर्दैववशात् लग्नवालः बलात् आत्मानं परिकर्षन् वालच्छेदेन मुक्तिम् अलभत ।

ततश्च सोऽचिन्तयत्, "कथमीदृशो बन्धूनां मुखं द्रक्ष्यामि । वालविरहेण स्वजातिपरिहीनः शोच्यः किल अभवम् । अथवा किमतः कर्तव्यम् । गतं नानुशोचितव्यम् । कथंचित् धैर्यमवलंब्य वर्तितव्यम्" इति ॥

अथ शनैः अरण्यं प्राप्तः सः बन्धुमित्रैः परिवार्य "अहो, किमेतदत्याहितम्" इति पृष्टः बुद्ध्या समालोच्य सकपटमेवमवोचत्, "अहो अस्मत्सुहृदः, बान्धवाश्च, पश्यत मां वालगुच्छं विच्छिद्य लघु प्लवमानम् । एवं यूयमपि वृथाभारभूतं पुच्छं परिहरत । अनुभवत गतिलाघवम् । प्राप्नुत सौन्दर्यश्रियम्" इति । तदानीं कश्चित् वृद्धशृगालोऽभाषत—"सखे, सुष्ठु खलु जानीमो

वयं, यदि दौर्भाग्यवशात् न भवान् छिन्नवालः अभविष्यत् नेदानीमीदृशमवदिष्यत् इति । कस्य नाम जन्मसिद्धं जातिलाञ्छनं न प्रेयः" इति ॥

ततश्च सर्वे शृगालाः तं मिथ्योपदेष्टारं क्रुद्धाः प्रहृत्य विद्रावयामासुः ॥

एवं किल लोके स्वयं भ्रष्टः परानपि भ्रंशयितुं त्वरते ॥

पाठः IX

॥ आरण्यकवरुणयोः ॥

कश्चित् आरण्यकः नदीतीरे वृक्षशाखां कुठारेण यदा छिनत्ति तावत् तस्य करात् भ्रष्टः कुठारः जले न्यपतत् । सः भ्रष्टं कुठारम् उद्धर्तुमशक्नुवन् शुशोच । अथ तस्य पुरः वरुणः आविर्भूय अपृच्छत् "भद्र, कस्मात् रोदिषि" इति । आरण्यकोऽवदत् "शाखां लुनतो मम हस्तात् भ्रष्टः कुठारो जले निपतितः" इति । ततः प्रचेताः नदीमवगाह्य हैमेनैकेन कुठारेणोदमज्जत् । अपृच्छत् च आटविकम्, "किमयमेव ते प्रवाहपतितः परशुः" इति । आरण्यकः नेत्याह । अथ

भूयः प्रवाहे निमज्ज्य पाशभृत् राजतं परश्वनं समानिनाय । "अयमपि न मदीयः" इत्याचख्यौ तथ्यवादी स वृक्षच्छेदी ।

अथ तृतीये वारे सलिलेश्वरः आयसं परश्वधं प्रवाहादुदधीधरत् । तं दृष्ट्वा सप्रमोदमाह स काष्ठविक्रयी "अयमेव मे कुठारः" इति ॥

तस्यार्जवेन तुष्टः पाशी तस्मै कुठारत्रयमपि दत्त्वा अन्तर्दधे ॥

अलुब्धस्य प्रसीदन्ति दैवतानि ॥

पाठः X

॥ धूर्तमाया ॥

कश्चित् ब्राह्मणः कुतश्चित् यज्ञपशुं याचित्वा स्कन्धे वहन् पन्थानमगच्छत् ।

मार्गागताः त्रयो धूर्ताः छागमनेनोह्यमानं दृष्ट्वा तस्मिन् अभ्यवहारार्थं स्पृहामकुर्वन् । ततस्ते कृतसंकेताः पृथग्भूय मार्गे अतिष्ठन् । अथ केनचिदन्तरेण स्थितः प्रथमो धूर्तः ब्राह्मणं निजगाद, "भोः ब्राह्मण, कुतः श्वानं स्कन्धे वहसि ?" इति ॥

ब्राह्मणः "प्रलपत्ययं मूर्खः" इति तमनादृत्य ययौ। ततः क्रोशमात्रेण अभिमुखीभूतः द्वितीयो धूर्तः प्राब्रूत- "कथं भोः, भवान् ब्राह्मणः सन् अशुचिं सारमेयं स्कन्धे वहति। इदमनर्हं भवतः पश्यामि" इति॥

ब्राह्मणः स्तोकं शंकया कलुषितः सन्नपि तम् "अपेहि रे जाल्म। किं तव अनया चिन्तया" इति सावज्ञम् उक्त्वा पुरः परिचक्राम॥

अनन्तरं क्वचिदुपेतः तृतीयो धूर्तः ब्राह्मणं साश्चर्यमिव निध्याय धृष्टमुदाजहार, "किं नु भोः पश्यामि विपरीतम्। विषमोऽयं कालः यस्मिन् ब्राह्मणः कुक्कुरं समाश्लिष्य लालयति। भोः मा तावदेष दुष्टःश्वा भवतो गलमांसं चर्वयतु" इति।

एतत् श्रुत्वा स विप्रः, "आसीन्मे भ्रम इति मन्ये। कथमन्यथा सर्वोऽपि लोकः श्वानमेनं वेत्ति। अहो वञ्चितोऽस्मि कृपणेन तेन गृहस्थेन यः यज्ञपशुं याचितः सारमेयमदापयत्।" इति चिन्तयन् विषण्णः स्कन्धात् छागं सद्यः समवतार्योत्सृज्य नद्यां स्नात्वा गृहमगच्छत्।

ते च धूर्ताः छागं गृहीत्वा तुष्टाः पलायन्त॥

धूर्तमाया परमार्थविदमपि मोहयति॥

पाठः XI

।। अवयवेषु कुक्षिः ।।

एकदा मनुष्यावयवाः संमेलनम् अकुर्वन् । तेषु कुक्षिः अग्रासनम् अपेक्षत । स उवाच "यूयं सर्वे मम किंकराः । मदर्थमेव यूयं यत्नं कुरुथ । तस्मात् अहमेव युष्माकं श्रेष्ठः" इति ॥

मुखम् अब्रवीत् "मयि वाक् निवसति । तस्मात् अहमेव अग्रासनम् अर्हामि" इति ॥

बाहू आहतुः "शौर्यं कौशलं च सर्वकर्मसु आवयोः स्थितम् । तत् आवामेव श्रेष्ठौ" इति ।

चक्षुषी प्रोचतुः "सर्वेषु गात्रेषु नयनं प्रधानम्" इति लोको जानाति । नेत्रहीनः कथं कर्मसु प्रवर्तेत । तस्मात् आवामेवं श्रेष्ठे" इति ॥

अथ चरणाभ्याम् उक्तम् "सर्वं मनुष्यकार्यं अस्मदधीनम् । आवाभ्यां विना कथं मनुष्यः स्थानात् स्थानं गन्तुं शक्नोति । चंक्रमणहीनः पुरुषः द्रुम इव निश्चेष्टः कस्मै प्रयोजनाय कल्पते । तस्मादावाम् एव श्रेष्ठौ भवावः ।" इति ॥

एवं वदतः सर्वान् श्रुत्वा कुक्षिः पुनरभ्यधात् "युष्माकं सर्वेषामपि व्यापारः मत्तृप्त्यर्थमेव । तस्मात् अहमेव अग्रिमः । यूयं मदाज्ञायां वर्तध्वे । नात्र संशयः । तदग्रासनम् आरोहामि" इति ॥

अवयवाः कुक्षेः सगर्वं वचः श्रुत्वा क्रुद्धाः अवोचन्, "न वयम् इतः परं त्वद्धेतोः क्लेशमनुभविष्यामः । द्रक्ष्यामः ते कीदृशः उत्कर्षः इति" इति ॥

अथ यदा सर्वेभ्यापारेभ्यो विरताः अवयवाः, तदा न केवलं कुक्षिः म्लायते स्म, ते अपि अवयवाः म्लायन्ते स्म । वाक् न अभाषत । बाहू नाचेष्टेताम् । चक्षुषी मन्दे अभवताम् । चरणौ नास्पन्देताम् । ते ऊचुः दीनम् अन्योन्यं बोधयन्तः, "कुक्षिपोषणे कृते एव अस्माकं स्वस्वोचितेषु कार्येषु शक्तिः भवति । तस्मात् वयं कुक्षेः किंकरा एव" इति ॥

अथ ते प्रीत्या कुक्षेः अग्रासनं वितीर्य स्वे स्वे कर्मणि प्रावर्तन्त ॥

एकावयविनाम् असंघर्षः सुखाय ॥

पाठः XII

॥ वानरसाम्राज्यम् ॥

द्वौ पान्थौ कान्तारमार्गे साम्राज्यकारिणां वानराणां हस्ते पतितौ । ते वानराः, "नरेभ्योऽपि वयं समर्थाः राजनीतौ, विचक्षणाः कलासु, प्रकृष्टाः शौर्ये च" इति सुस्फीतम् अभिमानम् अवहन् ॥

नरौ एतौ गृहीतवतां तेषां महत् कौतुकम् अजनिष्ट, "किमेतौ अस्मत्साम्राज्यं दृष्ट्वा विस्मितौ न भविष्यतः" इति । तेन हि तौ एते सम्राजः समीपं प्रापयामासुः ॥

सम्राट् महामर्कटः सभां संमेल्य मन्त्रिभिः ताम् अध्यतिष्ठत् । अथ पश्यतोः पान्थयोः विविधाः राजानुमोदिताः मर्कटव्यापाराः प्रवर्तिताः आसन् । सन्नद्धवेषा वानर्यो ननृतुः । वानराः मर्दलादिवाद्यैः सहिताः अगायन् । ततो वानरवीराः विचित्रान् व्यायामान् अदर्शयन् । अनेके शिल्पिनः स्वस्वकौशलं न्यरूपयन् । वन्दिनः वालिसुग्रीवप्रभृतीनां पुराणानां कूटस्थानां महिम्नः स्तवं वानरभाषया निबद्धम् अपठन् ॥

अन्ते च सम्राडपृच्छत्, "भोः, मानुषौ, किं मन्येथे युवां वानराणां साम्राज्यवैभवम् ईदृशं दृष्ट्वा ? । तथ्यं ब्रूतम्; किं नराः श्रेष्ठाः उत वानराः ।" इति ॥

प्रथमः कार्यवादी देशकालवित् अब्रवीत्, "प्लवंगमप्रभो, किमुच्यते । न मे वाग्विभवः वर्णयितुं भवतो राज्यभारस्य प्रभावम् । सर्वथा नरा लज्जेरन् ईदृशान् विज्ञानशोभिनो युष्मान् दृष्ट्वा" इति ॥

एनां श्लाघां श्रुत्वा राजा प्रसन्नः तं पुरुषं बहुभिः सुवर्णैः संमान्य यथेच्छगमनाय व्यसृजत् ॥

अथ द्वितीयमाह, "तवापि हृदयस्थितं श्रोतुमिच्छामः" इति ॥

तथ्यवादी स्वहितमस्मरन् अनाकलितभयः सोऽभ्यधात्, "वरं युष्माभिः मदाशयो न श्रुतः । नाहं मिथ्या स्तुतिषु प्रवीणः । सुशिक्षिता अपि वानराः वानरा एव । वानरचेष्टाः नराणां सर्वथा हास्योद्बोधकाः इति अवितथम् । किं मुधा गर्वं वहथ" इति ॥

एवमुक्तवन्तं तं पान्थं क्रोधोद्वृत्तनयनः कीशस्वामी निरीक्ष्य किंकरान् आज्ञापयामास, "राजापवादी दुर्जनोऽयं मनुष्यः यथार्हं दण्डं विधाय निर्वास्यताम्" इति ॥

एवमाज्ञप्ताः वानराः पान्थस्योपरि निपत्य नखदं-ष्ट्रादिभिः तं व्रणयामासुः । पान्थः कृच्छ्रेण आत्मानम् उन्मोच्य प्राणान् परिरक्षन् पलायामास ॥

प्रभवतां पुरः स्तुतिपाठका एव महीयन्ते,
न तथ्यपथ्यवादिनः ॥

पाठः XIII

॥ महाकविवाक्यानि ॥

(१)

ज्ञानं ज्योतिः, अज्ञानं तमः ।
नोद्यमात् परं मित्रम्, नालस्यात् परो रिपुः ।
सतां शुद्धमन्तःकरणम् असतां तु कलुषम् ।
धर्मेण स्नेहो वर्धते, अधर्मेण तु द्वेषः ।
करुणा महात्मनां लक्षणम्, क्रौर्यं तु दुरात्मनाम् ।
त्यागेन यशो लभ्यते, लोभेन तु अयशः उपार्ज्यते ।
पण्डिताःधनमपि तृणं मन्यते, पामरास्तु तृणमपि धनं मन्यते ।
विवेकिनः संपदि न हृष्यन्ति, विपदि न विषीदन्ति ॥

(२)

सुखं दुःखं च सर्वप्राणिनामविशेषेण प्रवर्तेते ।
आतपतप्तस्य तरुच्छाया विशेषतः सुखावहा भवति ।
विपश्चितां संसर्गेण मन्दोऽप्यमन्दो भवति ।
सचक्षुरपि तमसि दीपेन विना दृश्यं न पश्यति ।
न्यायप्रवृत्तस्य तिर्यञ्चोऽपि सहायतां यान्ति ।
अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति ॥
अर्थिनः महतां गृहेभ्यः पूर्णकामाः प्रतिनिवर्तन्ते ।
दारुणेऽप्यापतिते व्यसने वज्रदृढानि महतां मनांसि न भिद्यन्ते ।
लोके न किञ्चिन्निर्दोषम्, न च किञ्चिन्निर्गुणम् ।
दुर्बला अपि संहत्या बलिष्ठा भवन्ति ॥

(३)

सन्तः परेषां गुणान् श्लाघन्ते, दोषान् अन्तर्नियच्छन्ति ।
आर्तत्राणाय शस्त्रभृतः वीराः । न तु अनागसः पीडनाय ।
अग्नेः ऋणस्य शत्रोः रोगस्य वा शेषं नोपेक्षेत ।
आकारेणैव चतुराः परेङ्गितं तर्कयन्ति ।
विपश्चितां समाजे अपण्डितानां मौनमेव विभूषणम् ।
संगीतसाहित्यकलाविहीनः साक्षात् पशुरेव । किन्तु तस्य पुच्छविषाणौ न स्तः ।
ज्ञानलवदुर्विदग्धं नरं ब्रह्माऽपि न रञ्जयति, कुतो विद्वज्जनः ।
सान्त्वनेन शत्रुरपि मित्रं भवति ।

हितमुक्तं बालादपि शुकादपि ग्राह्यम् ।
मृगा मृगैः सङ्गमिच्छन्ति, गावः गोभिः, तुरगास्तुरङ्गैः,
मूर्खाः मूर्खैः, सुधियश्च सुधीभिः ।
समानशीलव्यसनेषु सख्यं संभवति ॥
स्वभावः उपदेशेन अन्यथा कर्तुं न शक्यते ।
पात्रविशेषं प्राप्य विद्या उत्कर्षं पुष्णाति ।
पयोदस्य जलविन्दुः समुद्रशुक्तौ पतितं मुक्ताफलतां व्रजति ।
विभवे सति पुंसः मित्राणि सन्ति पदे पदे ।
आपदि यन्मित्रं तदेव सन्मित्रम् ॥

(४)

यदि सिकताः पीडयन् तैलं लभेत, यदि मृगतृष्णिकासु सलिलं पिबेत्, यदि परिमृग्य शशविषाणमासादयेत् तदा विद्वान् मूर्खजनमप्याराधयेत् ॥

प्रसर्पन् अनलः जलेन शमयितुं शक्यः, सूर्यातपः छत्रेण वारयितुं शक्यः, नागेन्द्रः निशितेन अंकुशेन दमयितुं शक्यः, दण्डेन गर्दभः साधयितुं शक्यः, व्याधिः भेषजसेवनेन परिहर्तुं शक्यः, विषमपि मन्त्रप्रयोगैः निवर्तयितुं शक्यम्, एवं सर्वत्र प्रतीकारो दृष्टः, न तु कथंचित् मूर्खस्य ॥

(५)

विद्या नाम विदुषाम् अन्तः प्रच्छन्नगुप्तं धनम् । यत् सर्वदा किमपि शं पुष्णाति । यत् हर्तुः कथमपि गोचरं

न याति । यत् अर्थिभ्यः प्रतिपाद्यमानमपि परां वृद्धिं प्राप्नोति । विद्ययैव मनुष्यः पूज्यो भवति । विद्यया विहीनो नरः पशु-तुल्यः । पुरुषस्य किं भूषणम् । किं केयूराणि । किं हाराः । किं स्नानम् । किं विलेपनम् । किं कुसुमम् । किं अलंकृताः मूर्धजाः । नैतानि पुरुषस्य भूषणानि भवन्ति । तानि सततं क्षीयन्ते । परं तु एकैव वाणी पुरुषं समलंकरोति, यदि सा संस्कृता धार्यते । वागेव उत्तमं भूषणं नरस्य ॥

(६)

गजः काननेषु विचरति । जन्तुषु स महान् । बलाढ्यश्च । सोऽपि मनुष्यैः गृह्यते । भुजगः पातालबिले निवसति । सः गरलेन भीषणः, सोऽपि मनुष्येण गृह्यते । विहंगः विहायसा गच्छति । तरूणां शिरःसु वसति । कोटरेषु निलीयते । सोऽपि जालिकैः बध्यते । शशी दिवाकरश्च सर्वो-ज्ज्वलौ रात्रिं दिवसं च कुर्वाते । तावपि कालगत्या राहुः पीडयति । मतिमन्तः सर्वोपायान् जानते । नीतिं विदन्ति । लोकवार्तासु निष्णाता भवन्ति । तथापि ते दरिद्राः सन्ति । एवं शीलिते, विधिरेव बलवान् इति मे प्रतिभाति ॥

(७)

मृगः तृणं चरित्वा वनेषु विश्राम्यति । मीनः जले वसन् सुखी भवति । सज्जनः स्वल्पेनापि लब्धेन अर्थेन सन्तुष्टः स्वजीवनं सफलयति । एते त्रयः वृत्तिहेतोः कस्यापि पीडां

नाचरन्ति। तथापि एतेषां निष्कारणं वैरिणः भवन्ति। लुब्धकाः मृगं जालैः गृह्णन्ति, शरैः वा घ्नन्ति। धीवराः मीनं जालैः बडिशैः वा गृहीत्वा मारयन्ति। पिशुनाः सज्जने दोषं वदन्तः तेषां वृत्तिनाशं विरचयन्ति। एवं साधुहिंसायां दुष्टानां प्रवृत्तिः लोके स्वाभाविकी दृश्यते॥

(८)

यावत् गिरयः सरितश्च महीतले स्थास्यन्ति, तावत्
रामायणकथा लोकेषु प्रचरिष्यति॥

हे निषाद, त्वं शाश्वतीः समाः प्रतिष्ठां मागमः।
यत् क्रौञ्चमिथुनात् एकम् अवधीः॥

राम, पूर्वा सन्ध्या प्रवर्तते। उत्तिष्ठ। दैवम् आह्निकं कर्तव्यम्।

इयं मम सुता सीता। एनां प्रतीच्छ। इयं ते सहधर्मचरी। अस्याः पाणिं पाणिना गृह्णीष्व।

महाबाहुं रघुवीरं छत्रावृताननं गजेन यान्तं द्रष्टुमिच्छामः।

रथेन समायान्तं रामं प्रासादात् पश्यन् नराधिपः न तृप्तिमगमत्।

अयि राघव यं धर्मं नियमेन पालयसि त्वं, स एव धर्मः त्वामभिरक्षतु।

कैकेयी स्वयं चीराण्याहृत्य जनमध्ये निरपत्रपा "परिधत्स्व" इति राघवमुवाच।

अथ सुमित्रा लक्ष्मणम् अब्रवीत् "पुत्र, रामे प्रमादं मा कार्षीः। रामं दशरथं विद्धि। जनकात्मजां मां विद्धि। अटवीम् अयोध्यां विद्धि। तात, यथा सुखं गच्छ॥

रामवियोगेन अन्तः पुरस्त्रीणाम् आर्तशब्दः महानभूत् । अयोध्यायां गृहमेधिनः न अपचन् । प्रजाः कार्यं नाकुर्वन् । गावो वत्सान् नापाययन् । नागाः कवलान् व्यसृजन् । वृक्षा अपि परिम्लानाः अभवन् । न कश्चित् हृष्टः अलक्ष्यत । सर्वः शोकपरायणः आसीत् । सर्वे सर्वं परित्यज्य राममेवान्वचिन्तयन् ।

अग्रे धनुष्पाणिः लक्ष्मणः, मध्ये सीता, पृष्ठतस्तु रामः इति व्रजन्तः ते दण्डकारण्यमविशन् ॥

गगनं गगनाकारं सागरः सागरोपमः ।
रामरावणयोर्युद्धं रामरावणयोरिव ॥

एति जीवन्तमानन्दो नरं वर्षशतादपि ॥

पाठः XIV

॥ कीलोत्पाटी वानरः ॥

कस्मिंश्चिन्नगराभ्याशे केनापि वणिक्पुत्रेण तरुषण्डमध्ये देवतायतनं कर्तुमारब्धम् । तत्र च ये कर्मकराः स्थपत्यादयः ते मध्याह्नवेलायाम् आहारार्थं नगरमध्यं गच्छन्ति । अथ कदाचित् तत्रानुषङ्गिकं वानरयूथमितस्ततश्च परिभ्रमदागतम् । तत्रैकस्य कस्यचित् शिल्पिनः अर्धस्फाटितः

अञ्जनवृक्षदारुमयः स्तम्भः खदिरकीलकेन मध्यनिहितेन तिष्ठति । एतस्मिन्नन्तरे ते वानराः तरुशिखरप्रासादशृङ्गदारुपर्यन्तेषु यथेच्छया क्रीडितुमारब्धाः । एकश्च तेषां प्रत्यासन्नमृत्युः चापल्यात् तस्मिन्नर्धस्फाटितस्तम्भे उपविश्य पाणिभ्यां कीलकं संगृह्य यावदुत्पाटयितुमारेभे तावत्तस्य स्तम्भमध्यगतार्धशरीरस्य स्वस्थानाच्चलितेन कीलकेन यद्वृत्तं तदप्रयत्नेनैवोह्यम् ॥

अव्यापारेषु व्यापारं यो नरः कर्तुमिच्छति ।
स एव निधनं याति कीलोत्पाटीव वानरः ॥

पाठः XV.

॥ कोमलपादो राक्षसः ॥

कस्मिंश्चिद्वनोद्देशे चण्डकर्मा नाम राक्षसः प्रतिवसति स्म । एकदा तेन भ्रमता अटव्यां कश्चित् ब्राह्मणः समासादितः । ततस्तस्य स्कन्धमारुह्य स प्रोवाच—"भोः, अग्रे सरो गम्यताम्" । ब्राह्मणोऽपि भयत्रस्तमनाः तमादाय प्रस्थितः । अथ तस्य कमलोदरकोमलौ पादौ दृष्ट्वा ब्राह्मणो राक्षसमपृच्छत्—भोः किमेवंविधौ ते पादौ अतिकोमलौ" इति । राक्षस आह, "भोः, व्रतमस्ति । नाहमार्द्रपादो भूमिं स्पृशामि" ॥

ततस्तच्छ्रुत्वा स आत्मनो मोक्षोपायं चिन्तयन् सरः प्राप्तः । ततो राक्षसेनाभिहितम्—"भोः, यावदहं स्नानं कृत्वा देवतार्चनविधिं विधायागच्छामि तावत् त्वया अतः स्थानात् अन्यत्र न गन्तव्यम् ।"

तथा गते तस्मिन्, द्विजः चिन्तयामास–"नूनं देवतार्चनविधेरूर्ध्वं मामेष भक्षयिष्यति । तद्द्रुततरं गच्छामि, येनैष आर्द्रपादो न मम पृष्ठमेष्यति ।" तेन तथानुष्ठिते, राक्षसो व्रतभङ्गभयात् तस्य पृष्ठं न गतः ॥

पृच्छकेन सदा भाव्यं पुरुषेण विजानता ।
राक्षसेन्द्रगृहीतोऽपि प्रश्नान्मुक्तो द्विजः पुरा ॥

पाठः XVI

॥ अतिकृपणः शृगालः ॥

अस्ति कस्मिंश्चिद्वनोद्देशे कश्चित्पुलिन्दः । स च पापर्द्धिं कर्तुं वनं प्रति प्रस्थितः । अथ तेन प्रसर्पता महानञ्जनपर्वतशिखराकारः क्रोडः समासादितः । स तं कर्णान्ताकृष्टनिशितसायकेन दृढं प्राविध्यत् । सोऽपि कोपाविष्टः क्रोडो बालेन्दुद्युतिना दंष्ट्राग्रेण पाटितोदरं पुलिन्दं गतासुं भूतले न्यपातयत् । अथ लुब्धकं व्यापाद्य शूकरोऽपि शरप्रहारवेदनया पञ्चत्वं गतः ।

एतस्मिन्नन्तरे कश्चिदासन्नमृत्युः शृगालः इतस्ततो निराहारतया पीडितः परिभ्रमन् तं प्रदेशमाजगाम । यावत् वराहपुलिन्दौ द्वावपि पश्यति तावत् प्रहृष्टो व्यचिन्तयत्— "भोः, अनुकूलो मे विधिः । तेनैतदचिन्तितं भोजनमुपस्थितम् । अथवा साध्विदमुच्यते—

अकृतेऽप्युद्यमे पुंसामन्यजन्मकृतं फलम् ।
शुभाशुभं समभ्येति विधिना संनियोजितम् ॥

तदहं तथा शनैरेतद् भक्षयामि यथा बह्न्यहानि मे प्राणयात्रा अनेन भवति । इदानीं तु तावदादौ धनुष्कोटिगतं स्नायुपाशमेव भक्षयामि । उक्तं च —

शनैः शनैश्च भोक्तव्यं स्वयं वित्तमुपार्जितम् ।
रसायनमिव प्राज्ञैर्हेलया न कदाचन ॥

इत्येवं मनसा निश्चित्य चापघटितकोटिं मुखमध्ये प्रक्षिप्य स्नायुं भक्षयितुं प्रवृत्तः । ततश्च त्रुटिते पाशे तालुदेशं विदार्य चापकोटिर्मस्तकमध्येन निष्क्रान्ता । सोऽपि तद्वेदनया तत्क्षणान्मृतः ॥

अतितृष्णा न कर्तव्या तृष्णां नैव परित्यजेत् ।
अतितृष्णाभिभूतस्य शिखा भवति मस्तके ॥

पाठः XVII

॥ बिलवाणी ॥

कस्मिंश्चिद्वनोद्देशे खरनखरो नाम सिंहः प्रतिवसति स्म। स कदाचिदितश्चेतश्च परिभ्रमन् क्षुत्क्षामकण्ठो न किंचिदपि सत्वमाससाद । ततश्चास्तमनसमये महतीं गिरिगुहामासाद्य प्रविष्टश्चिन्तयामास—"नूनमेतस्यां गुहायां रात्रौ केनापि सत्वेनागन्तव्यम् । तन्निभृतो भूत्वा तिष्ठामि ॥"

एतस्मिन्नन्तरे तत्स्वामी दधिपुच्छो नाम शृगालः समायातः । स च यावत् पश्यति तावत् सिंहपदपद्धतिः गुहायां प्रविष्टा न च निष्क्रमणं गता । ततश्चाचिन्तयत् "अहो, विनष्टोऽस्मि । नूनमस्याम् अन्तर्गतेन सिंहेन भाव्यम् । तत्किं करोमि । कथं ज्ञास्यामि ।" एवं विचिन्त्य दूरस्थः फूत्कर्तुमारब्धः—"अहो बिलं, अहो बिलं," इत्युक्त्वा तूष्णींभूय भूयोऽपि तथैव प्रत्यभाषत—"भोः किं न स्मरसि, यन्मया त्वया सह समयः कृतोऽस्ति । यथा मया बाह्यात् समागतेन त्वं वक्तव्यः । त्वया चाहमाकरणीय इति । तद्यदि मां नाह्वयसि ततोऽहं द्वितीयं बिलं यास्यामि ॥"

अथ तच्छ्रुत्वा सिंहश्चिन्तितवान्—"नूनमेषा गुहाऽस्य समागतस्य सदा समाह्वानं करोति । परमद्य मद्भयान्न किंचिद्ब्रूते । अथवा साध्विदमुच्यते—

भयसंत्रस्तमनसां हस्तपादादिकाः क्रियाः ।
प्रवर्तन्ते न वाणी च वेपथुश्चाधिको भवेत् ॥

तदहमस्याह्वानं करोमि येन तदनुसारेण प्रविष्टोऽयं मे भोज्यतां यास्यति''। एवं संप्रधार्य सिंहस्तस्याह्वानमकरोत्। अथ सिंहशब्देन सा गुहा प्रतिरवसंपूर्णा अन्यानपि दूरस्थानरण्यजीवांस्त्रासयामास । शृगालोऽपि पलायमान इमं श्लोकमपठत्—

अनागतं यः कुरुते स शोभते
स शोच्यते यो न करोत्यनागतम् ।
वनेऽत्र संस्थस्य समागता जरा
बिलस्य वाणी न कदापि मे श्रुता ॥

पाठः XVIII

॥ क्षेत्रपालो नागः ॥

अस्ति कस्मिंश्चिदधिष्ठाने हरिदत्तो नाम ब्राह्मणः । तस्य च कृषिं कुर्वतः सदैव निष्फलः कालोऽतिवर्तते । अथैकस्मिन् दिवसे स घर्मार्तः क्षेत्रमध्ये वृक्षच्छायायां प्रसुप्तो नातिदूरे वल्मीकोपरि प्रसारितबृहत्फटायुक्तं भीषणं भुजंगमं दृष्ट्वा चिन्तयामास—"नूनमेषा क्षेत्रदेवता

मया कदाचिदपि न पूजिता । तेनेदं मे कृषिकर्म विफली-भवति। तदस्या अहं पूजामद्य करिष्यामि" । इत्यवधार्य कुतोऽपि क्षीरं याचित्वा शरावे निक्षिप्य वल्मीकान्तिक-मुपगम्योवाच—"भोः, क्षेत्रपाल, मयैतावन्तं कालं न ज्ञातं यत् त्वमत्र वससि। तेन पूजा न कृता। तत्सांप्रतं क्षमस्व" इति। एवमुक्त्वा दुग्धं च निवेद्य गृहाभिमुखं प्रायात्। अथ प्रातर्यावदागत्य पश्यति, तावत् दीनारमेकं शरावे दृष्टवान्। एवं च प्रतिदिनमेकाकी समागत्य तस्मै क्षीरं ददाति । एकैकं च दीनारं गृह्णाति ॥

अथैकस्मिन् दिवसे वल्मीके क्षीरनयनाय पुत्र नियोज्य ब्राह्मणो ग्रामान्तरं जगाम। पुत्रोऽपि क्षीरं तत्र नीत्वा संस्थाप्य च पुनर्गृहं समायातः। दिनान्तरे तत्र गत्वा दीनार-मेकं च दृष्ट्वा गृहीत्वा च चिन्तितवान्—"नूनं सौवर्णदी-नारपूर्णोऽयं वल्मीकः। तदेनं हत्वा सर्वमेकवारं ग्रहीष्यामि।" इत्येवं संप्रधार्यान्येद्युः क्षीरं ददता ब्राह्मणपुत्रेण सर्पो लगु-डेन शिरसि ताडितः। ततः कथमपि दैववशादमुक्तजीवितः स सर्पः रोषात्तमेव ब्राह्मणपुत्रं तीव्रविषदशनैस्तथाऽदशत् यथा स सद्यः पञ्चत्वमुपगतः॥

कालेन श्रियमभ्येति पुरुषः कालंकर्मवित्।
दुर्लभा सा पुनस्तेन कालेकर्माचिकीर्षता॥

पाठः XIX

॥ सिंहकारकाः ॥

कस्मिंश्चिदधिष्ठाने चत्वारो ब्राह्मणपुत्राः परस्परं मित्रभावमुपगताः वसन्ति स्म । तेषां त्रयः शास्त्रपारंगताः, परं तु बुद्धिरहिताः । एकस्तु बुद्धिमान् केवलं शास्त्रपराङ्मुखः । अथ तैः कदाचिन्मित्रैर्मन्त्रितम्—"को गुणो विद्यया येन देशान्तरं गत्वा भूपतीन् परितोष्य अर्थोपार्जना न क्रियते । तत्पूर्वदेशं गच्छामः ।"

तैः तथानुष्ठिते, कञ्चिन्मार्गं गतवत्सु च तेषु, ज्येष्ठः प्राह—"अहो, अस्माकमेकश्चतुर्थो मूढः, केवलं बुद्धिमान् । न च राजप्रतिग्रहो बुद्ध्या लभ्यते विद्यां विना । तन्नास्मै स्वोपार्जितं दास्यामः । तद् गच्छतु गृहम् ।"

ततो द्वितीयेनाभिहितम्—"भोः, सुबुद्धे, गच्छ त्वम् स्वगृहं, यतस्ते विद्या नास्ति ॥"

ततस्तृतीयेनाभिहितम्—"अहो, न युज्यते एवं कर्तुम् । यतो वयं बाल्यात्प्रभृत्येकत्र क्रीडिताः । तदागच्छतु महानुभावः । अस्मदुपार्जितवित्तस्य समभागी भविष्यति" इति । उक्तं च,

अयं निजः परो वेति गणना लघुचेतसाम् ।
उदारचरितानां तु वसुधैव कुटुम्बकम् ॥

तदागच्छत्वेषोऽपि" इति ॥

तथानुमान्य तैर्मार्गाश्रितैः अटव्यां मृतसिंहस्य अस्थीनि दृष्टानि । ततश्चैकेनाभिहितम्—"अहो, अद्य विद्याप्रत्ययः क्रियते । किंचिदेतत् सत्वं मृतं तिष्ठति। तद्विद्याप्रभावेण जीवनसहितं कुर्मः । अहमस्थिसंचयं करोमि।"

ततश्चैकेनौत्सुक्यादस्थिसञ्चयः कृतः । द्वितीयेन चर्ममांसरुधिरं संयोजितम्। तृतीयोऽपि यावज्जीवं सञ्चारयति, तावत् सुबुद्धिना निषिद्धः—"भोः तिष्ठतु भवान्। एष सिंहो निष्पाद्यते। यद्येनं सजीवं करिष्यसि, ततः सर्वानपि व्यापादयिष्यति।" इति तेनाभिहितः स आह—"धिङ् मूर्ख, नाहं विद्याया विफलतां करोमि।"

ततस्तेनाभिहितम्—"तर्हि, प्रतीक्षस्व क्षणम्, यावदहं वृक्षमारोहामि।"

अथ तेन जीवसन्धात्रा यावत्सजीवः कृतः सिंहः तावत्ते त्रयोऽपि तेनोत्थाय व्यापादिताः। स च पुनर्वृक्षादवतीर्य गृहं गतः॥

वरं बुद्धिर्न सा विद्या विद्याया बुद्धिरुत्तमः।
बुद्धिहीना विनश्यन्ति यथा ते सिंहकारकाः॥

पाठः XX

॥ नीलीशृगालः ॥

कस्मिंश्चिद्वनप्रदेशे चण्डरवो नाम शृगालः प्रतिवसति स्म । स कदाचित् क्षुधाविष्टो जिह्वालौल्यान्नगरान्तरं प्रविष्टः । अथ तं नगरवासिनः सारमेया अवलोक्य सर्वतः शब्दायमानाः परिधाव्य तीक्ष्णदंष्ट्राग्रैर्भक्षयितुमारब्धाः । सोऽपि तैर्भक्ष्यमाणः प्राणभयात् प्रत्यासन्नरजकगृहं प्रविष्टः । तत्र च नीलीरसपरिपूर्णं महाभाण्डं सज्जीकृतमासीत् । तत्र सारमेयैराक्रान्तो भाण्डमध्ये पतितः । अथ यावन्निष्क्रान्तस्तावन्नीलीवर्णः संजातः । तत्रापरे सारमेयाः तं शृगालमजानन्तो यथाभीष्टदिशं जग्मुः ।

चण्डरवोऽपि दूरतरं प्रदेशमासाद्य काननाभिमुखं प्रतस्थे । न च नीलवर्णेन कदाचिन्निजरंगस्त्यज्यते । अथ तं हरगलगरलतमालसमप्रभमपूर्वं सत्वमवलोक्य सर्वे सिंहव्याघ्रद्वीपिवृकप्रभृतयोऽरण्यनिवासिनो भयव्याकुलचित्ताः समान्तात् पलायनक्रियां कुर्वन्ति । कथयन्ति च— "न ज्ञायतेऽस्य कीदृग्विचेष्टितं, पौरुषं च । तद्दूरतरं गच्छामः ।"

चण्डरवोऽपि तान् भयव्याकुलितान् विज्ञाय इदमाह— "भो, भोः श्वापदाः, किं यूयं मां दृष्ट्वैव संत्रस्ता व्रजथ । तन्न भेतव्यम् । अहं ब्रह्मणाऽद्य स्वयमेव सृष्ट्वाऽभिहितः— "यत् श्वापदानां मध्ये कश्चिद्राजा नास्ति । तत् त्वं

मयाऽद्य सर्वश्वापदप्रभुत्वेऽभिषिक्तः ककुद्द्रुमाभिधः । ततो गत्वा क्षितितले तान् सर्वान् परिपालय" इति । ततोऽहमत्रागतः । तन्मम छत्रच्छायायां सर्वैरेव श्वापदैः वर्तितव्यम् । अहं, ककुद्द्रुमो नाम राजा त्रैलोक्येऽपि संजातः ॥

तच्छ्रुत्वा सिंहव्याघ्रपुरःसराः श्वापदाः—"स्वामिन्, प्रभो, समादिश" इति वदन्तस्तं परिवव्रुः । अथ तेन सिंहस्यामात्यपदवी प्रदत्ता । व्याघ्रस्य शय्यापालत्वम् । द्वीपिनस्ताम्बूलाधिकारः । वृकस्य द्वारपालत्वम् । ये चात्मीयाः शृगालाः सर्वेऽपि अर्धचन्द्रं दत्वा निःसारिताः ॥

एवं तस्य राज्यक्रियायां वर्तमानस्य ते सिंहादयः मृगान् व्यापाद्य तत्पुरतः प्रक्षिपन्ति । सोऽपि प्रभुधर्मेण सर्वेषां तान् प्रविभज्य प्रयच्छति ।

एवं गच्छति काले कदाचित् तेन समागतेन दूरदेशे शब्दायमानस्य शृगालवृन्दस्य कोलाहलोऽश्रावि । तं शब्दं श्रुत्वा पुलकिततनुः आनन्दाश्रुपरिपूर्णनयनः उत्थाय तारस्वरेण विरोतुमारब्धवान् । अथ ते सिंहादयस्तं तारस्वरमाकर्ण्य शृगालोऽयमिति मत्वा सलज्जमधोमुखाः क्षणमेकं स्थित्वा मिथः प्रोचुः—"भोः, वाहिताः वयमनेन क्षुद्रशृगालेन । तद्वध्यताम्" इति ॥

सोऽपि तदाकर्ण्य पलायितुमिच्छन् तत्रैव सिंहादिभिः खण्डशः कृतो मृतश्च ॥

त्यक्ताश्चाभ्यन्तरा येन वाह्याश्चाभ्यन्तरीकृताः ।
स एव मृत्युमाप्नोति यथा राजा ककुद्द्रुमः ॥

पाठः XXI

॥ मण्डूकवाही सर्पः ॥

अस्ति वरुणाद्रिसमीपे एकस्मिन् प्रदेशे परिणतवया मन्दविषो नाम कृष्णसर्पः । स एवं चित्ते चिन्तितवान्—"कथं नाम मया सुखोपायवृत्त्या वर्तितव्यम्" इति । ततो वहुमण्डूकं ह्रदमुपगम्य शोकपरीतमिवात्मानं दर्शितवान् । अथ तथास्थितः स जलप्रान्तगतेनैकेन मण्डूकेन पृष्टः—"माम, किमद्य यथापूर्वमाहारार्थं न विहरसि ।" सोऽब्रवीत्—"भद्र, कुतो मे मन्दभाग्यस्य आहाराभिलाषः । यत्कारणम् अद्य रात्रौ प्रदोष एव मया आहारार्थं विहरमाणेन दृष्ट एको मण्डूकः । तद्ग्रहणार्थं मया क्रमः सज्जितः । सोऽपि मां दृष्ट्वा मृत्युभयेन स्वाध्यायप्रसक्तानां ब्राह्मणानामन्तरमपक्रान्तोऽविभावितो मया क्वापि गतः । तत्सदृशमोहितचित्तेन मया कस्यचिद् ब्राह्मणस्य सूनोः ह्रदतटजलान्तःस्थोऽङ्गुष्ठो दृष्टः । ततोऽसौ सपदि पञ्चत्वमुपागतः । अथ तस्य पित्रा

दुःखितेनाहं शप्तः यथा, 'दुरात्मन्, त्वया निरपराधो मत्सुतो दष्टः, तदनेन दोषेण त्वं मण्डूकानां वाहनं भविष्यसि । तत्प्रसादलब्धजीविकया वर्तिष्यसे' इति । ततोऽहं युष्माकं वाहनार्थमागतोऽस्मि ॥"

तेन च सर्वमण्डूकानामिदमावेदितम् । ततस्तैः प्रहृष्टमनोभिः सर्वैरेव गत्वा जलपादनाम्नो दर्दुरराजस्य विज्ञप्तम् । अथासावपि मन्त्रिपरिवृतोऽत्यद्भुतमिदमिति मन्यमानः ससंभ्रमं ह्रदादुत्तीर्य मन्दविषस्य फणिनः फणप्रदेशमधिरूढः । शेषा अपि यथाज्येष्ठं तत्पृष्ठोपरि समारुरुहुः । किं बहुना, तदुपरि स्थानमप्राप्तवन्तः तस्यानुपदं धावन्ति । मन्दविषोऽपि तेषां तुष्ट्यर्थमनेकप्रकारान् गतिविशेषानदर्शयत् । अथ जलपादो लब्धतदङ्गस्पर्शसुखः तमाह—

"न तथा करिणा यानं तुरगेण रथेन वा ।
नरयानेन वा यानं यथा मन्दविषेण मे ॥"

अथान्येद्युश्छद्मना मन्दविषो मन्दं मन्दं विसर्पति । तच्च दृष्ट्वा जलपादोऽब्रवीत्—"भद्र, मन्दविष, यथापूर्वं किमद्य साधु नोह्यते ।" मन्दविषोऽब्रवीत्—"देव, अद्य आहारवैकल्यान्न मे वोढुं शक्तिरस्ति ॥" अथासावब्रवीत्—"भद्र, भक्षय क्षुद्रमण्डूकान् ।" तच्छ्रुत्वा प्रहर्षितसर्वगात्रो मन्दविषोऽब्रवीत्, "ममायमेव विप्रशापोऽस्ति । तत्तवानेनानुज्ञावचनेन प्रीतोऽस्मि ॥"

ततोऽसौ नैरन्तर्येण मण्डूकान् भक्षयन् कतिपयैरेवाहोभिः बलवान् संवृत्तः । प्रहृष्टश्चान्तर्लीनमवहस्येदमब्रवीत्—

"मण्डूका विविधा ह्येते छलपूर्वोपसाधिताः ।
कियन्तं कालमक्षीणा भवेयुः खादिता मम ॥"

जलपादोऽपि मन्दविषेण कृतकवचनव्यामोहितचित्तः किमपि नावबुद्ध्यते । किं बहुना, तथा तेन सर्वेऽपि भक्षिताः, यथा बीजमात्रमपि नावशिष्टम् ॥

स्कन्धेनापि वहेच्छत्रुं कालमासाद्य बुद्धिमान् ।
महता कृष्णसर्पेण मण्डूका बहवो हताः ॥

पाठः XXII

॥ श्रेष्ठिवणिजोः ॥

अस्ति कस्मिंश्चिदधिष्ठाने जीर्णधनो नाम वणिक्पुत्रः । स च विभवक्षयाद्देशान्तरगमनं व्यचिन्तयत् । तस्य च गृहे लोहभारघटिता पूर्वपुरुषार्जिता तुला आसीत् । तां च कस्यचित् श्रेष्ठिनो गृहे निक्षेपभूतां कृत्वा देशान्तरं प्रस्थितः ।

ततः सुचिरं कालं देशान्तरं यथेच्छया भ्रान्त्वा पुनः स्वपुरमागत्य स तं श्रेष्ठिनमुवाच—"भोः, श्रेष्ठिन्, दीयतां

सा मे निक्षेपतुला ।" स आह—भोः, नास्ति सा त्वदीया तुला । मूषिकैर्भक्षिता ।" जीर्णधन आह—"भोः, श्रेष्ठिन्, नास्ति दोषस्ते यदि मूषिकैर्भक्षितेति । ईदृगेवायं संसारः । न किञ्चिदत्र शाश्वतमस्ति । परमहं नद्यां स्नानार्थं गमिष्यामि । तत्त्वमात्मीयं शिशुमेनं धनदेवनामानं मया सह स्नानोपकरणहस्तं प्रेषय" इति ॥

सोऽपि चौर्यभयात्तस्य शंकितः स्वपुत्रमुवाच—"वत्स, पितृव्योऽयं तव स्नानार्थं नदीं यास्यति । तद्गम्यतामनेन सार्धं स्नानोपकरणमादाय" इति । अहो साध्विदमुच्यते—

न भक्त्या कस्यचित् कोऽपि प्रियं प्रकुरुते नरः ।
मुक्त्वा भयं प्रलोभं वा कार्यकारणमेव वा ॥

अथासौ श्रेष्ठिनः शिशुः स्नानोपकरणमादाय प्रहृष्टमनास्तेनाभ्यागतेन सह प्रस्थितः ॥

अथ कृतस्नानो जीर्णधनः तं शिशुं नदीगुहायां प्रक्षिप्य तद्द्वारं बृहच्छिलया आच्छाद्य सत्वरं गृहमागतः । पृष्टश्च तेन श्रेष्ठिना—"भोः, कथ्यतां कुत्र मे शिशुः यस्त्वया सह नदीं गतः" इति, स आह—"नदीतटात् स श्येनेन हृतः" इति ॥

श्रेष्ठ्याह—"मिथ्यावादिन्, किं कश्चित् श्येनः बालं हर्तुं शक्नोति । तत्समर्पय मे सुतम् । अन्यथा राजकुले

निवेदयिष्यामि ।" इति । स आह—"भोः, सत्यवादिन्, यथा श्येनो बालं न नयति तथा मूषिका अपि लोहभारघटितां तुलां न भक्षयति । तदर्पय मे तुलां, यदि दारकेण प्रयोजनम्" ॥

एवं तौ विवदमानौ द्वावपि राजकुलं गतौ । तत्र श्रेष्ठी तारस्वरेण प्रोवाच—"भोः अब्रह्मण्यमब्रह्मण्यम् । मम शिशुरनेन चोरेणापहृतः ।" अथ धर्माधिकारिणो वणिजमूचुः—"भोः, समर्प्यतां श्रेष्ठिसुतः ।" स आह—"किं करोमि । पश्यतो मे नदीतटात् श्येनेनापहृतः शिशुः ।" तच्छ्रुत्वा ते प्रोचुः—"भोः न सत्यमभिहितं भवता । किं श्येनः शिशुं हर्तुं समर्थो भवति । स आह—"भो भोः, श्रूयतां मद्वचः—

तुलां लोहसहस्रस्य यत्र खादन्ति मूषिकाः ।
राजंस्तत्र हरेच्छ्येनो बालकं नात्र संशयः ॥"

ते प्रोचुः—"कथमेतत् ।" ततः स वणिक् सभ्यानामग्रे आदितः सर्वं वृत्तान्तं निवेदयामास । ततस्तैर्विहस्य द्वावपि तौ परस्परं संबोध्य तुलांशिशुप्रदानेन सन्तोषितौ ॥

न भक्त्या कस्यचित् कोऽपि प्रियं प्रकुरुते नरः ।
मुक्त्वा भयं प्रलोभं वा कार्यकारणमेव वा ॥

पाठः XXIII

।। आषाढभूतिः ।।

अस्ति कस्मिंश्चिद्विविक्ते प्रदेशे मठायतनम् । तत्र देवशर्मा नाम परिव्राजकः प्रतिवसति स्म । तस्यानेकसाधुजनदत्तसूक्ष्मवस्त्रविक्रयवशात् कालेन महती वित्तमात्रा संजाता । ततः स न कस्यचिद्विश्वसिति । नक्तंदिनं कक्षान्तरात् तां मात्रां न मुञ्चति ॥

अथाषाढभूतिर्नाम परवित्तापहारी धूर्तस्तामर्थमात्रां तस्य कक्षान्तरगतां लक्षयित्वा, "कथं मयास्येयमर्थमात्रा हर्तव्या" इति विचिन्तयंस्तस्यान्तिकमुपगम्य, "ओम्, नमः शिवाय" इति प्रोच्चार्य साष्टाङ्गं प्रणम्य च सप्रश्रयमुवाच—"भगवन्, असारः संसारोऽयम् । गिरिनदीवेगोपमं यौवनम् । तृणाग्निसमं जीवितम् । शरदभ्रच्छायासदृशाः भोगाः । स्वप्नसदृशः पुत्रमित्रकलत्रभृत्यवर्गसंबन्धः । एवं मया सम्यग्परिज्ञातम् । तत्किं कुर्वतो मे संसारसमुद्रोत्तरणं भविष्यति ।" इति ॥

तच्छ्रुत्वा देवशर्मा सादरमाह—"वत्स, धन्योऽसि यत्प्रथमे वयस्येवं विरक्तभावः । यच्च मां संसारसागरोत्तरणोपायं पृच्छसि ॥

तच्छ्रुत्वा आषाढभूतिस्तत्पादौ गृहीत्वा सप्रश्रयमिदमाह—"भगवन्, तर्हि दीक्षया मे अनुग्रहं कुरु ।" देवशर्मा आह—"वत्स, अनुग्रहं ते करिष्यामि । परं तु रात्रौ त्वया मठमध्ये न प्रवेष्टव्यम्। यत्कारणं निःसङ्गता यतीनां प्रशस्यते तव च ममापि च। तत् त्वया व्रतग्रहणानन्तरं मठद्वारे तृणकुटीरके शयितव्यम्" इति । स आह—"भगवन्, भवदादेशः प्रमाणम्। परत्र हि तेन मे प्रयोजनम् ॥"

अथ कृतशयनसमयमाषाढभूतिं देवशर्मा अनुग्रहं कृत्वा शास्त्रोक्तविधिना शिष्यतामनयत्। सोऽपि हस्तपादावमर्दनादिपरिचर्यया तं परितोषमनयत् । पुनस्तथापि मुनिः कक्षान्तरान्मात्रां न मुञ्चति ॥

अथैवं गच्छति काले देवशर्मणः शिष्यपुत्रः कश्चित् ग्रामादामन्त्रणार्थं समायातः । प्राह च, "भगवन्, पवित्रारोपणकृते मम गृहमागम्यताम्" इति । तच्छ्रुत्वा देवशर्मा आषाढभूतिना सह प्रहृष्टमनाः प्रस्थितः ।

अथैवं तस्य गच्छतः अग्रे काचिन्नदी समायाता । तां दृष्ट्वा मात्रां कक्षान्तरादवतार्य कन्थामध्ये सुगुप्तां निधाय आषाढभूतिमिदमाह—"भोः, आषाढभूते, यावदहं बहिर्भूमिं गत्वा स्नात्वा देवार्चनादिकं च विधाय समागच्छामि तावदेषा कन्था योगेश्वरस्य सावधानतया रक्षणीया" इत्युक्त्वा गतः ॥

आषाढभूतिरपि तस्मिन्नदर्शनीभूते मात्रामादाय सत्वरं प्रस्थितः । देवशर्माऽपि छात्रगुणानुरञ्जितमनाः सुविश्वस्तो यावदनुष्ठानादिकं निर्वर्त्य शनैः शनैः निवृत्तो यदा आषाढभूतिं न पश्यति, कन्थां च नालोकयति, तदा "हाहा, मुषितोऽस्मि" इति जल्पन् पृथिवीतले मूर्छया निपपात । ततः क्षणात् चेतनां लब्ध्वा भूयोऽपि समुत्थाय फूत्कर्तुमारब्धः— "भो, आषाढभूते, क्व मां वञ्चयित्वा गतोऽसि । तद्देहि मे प्रतिवचनम् ।"

एवं बहु विलप्य तस्य पदपद्धतिमलभमानः वित्तनाश-समुद्भूतशोकविकलः पुनरपि स्वकीयं मठायतनं जगाम ॥

प्रमादिनं गृहोपान्ते परद्रव्यापहारिणः ।
सामादिसज्जितैः पाशैः प्रतीक्षन्ते दिवानिशम् ॥

पाठः XXIV

॥ धर्मबुद्धिः पापबुद्धिश्च ॥

कस्मिंश्चिदधिष्ठाने धर्मबुद्धिः पापबुद्धिश्च द्वे मित्रे प्रतिवसतः स्म । अथ कदाचित् पापबुद्धिना चिन्तितम्— "अहं तावन्मूर्खो दारिद्र्योपेतश्च । तदेनं धर्मबुद्धिमादाय देशान्तरं गत्वा अस्याश्रयेणार्थोपार्जनं कृत्वा एनमपि वञ्चयित्वा सुखी भवामि ।"

अथान्यस्मिन्नहनि पापबुद्धिर्धर्मबुद्धिं प्राह—"भो, मित्र, उक्तं किल,

देशान्तरेषु बहुविधभाषावेषादि येन न ज्ञातम् ।
भ्रमता धरणीपीठे तस्य फलं जन्मनो व्यर्थम् ॥

अपिच,

विद्यां वित्तं शिल्पं तावन्नाप्नोति मानवः सम्यक् ।
यावद्व्रजति न भूमौ देशाद्देशान्तरं हृष्टः ॥"

तद्देशान्तरमदृष्ट्वा वार्धकभावे किं तावदात्मविचेष्टितं स्मरसि । कां वा शिशुजनस्य वार्तां कथयिष्यसि ॥

अथ तस्य तद्वचनमाकर्ण्य धर्मबुद्धिः प्रहृष्टमनाः तेनैव सह गुरुजनानुज्ञातः शुभेऽहनि देशान्तरं प्रस्थितः । तत्र च धर्मबुद्धिप्रभावेण भ्रमता पापबुद्धिना प्रभूततरं वित्तमासादितम् । ततश्च द्वावपि तौ प्रभूतोपार्जितद्रव्यौ प्रहृष्टौ स्वगृहं प्रत्यौत्सुक्येन निवृत्तौ ॥

अथ स्वस्थानसमीपवर्तिना पापबुद्धिना धर्मबुद्धिरभिहितः—"भद्र, न सर्वमेतद्धनं गृहं प्रतिनेतुं युज्यते । यतः कुटुम्बिनो बान्धवाश्च प्रार्थयिष्यन्ते । तदत्रैव वनगहने क्वापि भूमौ निक्षिप्य किञ्चिन्मात्रमादाय गृहं प्रविशावः । भूयोऽपि प्रयोजने सञ्जाते तन्मात्रं समेत्य अस्मात्स्थानान्नेष्यावः । उक्तं च,

न वित्तं दर्शयेत् प्राज्ञः कस्यचित् स्वल्पमप्यहो।
मुनेरपि यतस्तस्य दर्शनाच्चलते मनः॥

तदाकर्ण्य धर्मबुद्धिराह—"भद्र, एवं क्रियताम्।" तथाऽनुष्ठिते द्वावपि तौ स्वगृहं गत्वा सुखेन स्थितवन्तौ। अथान्यस्मिन्नहनि पापबुद्धिः निशीथे अटवीं गत्वा तत्सर्वं वित्तं समादाय गर्तं पूरयित्वा स्वभवनं जगाम॥

अथान्येद्युः धर्मबुद्धिं समभ्येत्य स प्रोवाच—"सखे, बहुकुटुम्बा वयं वित्ताभावात्सीदामः। तद्गत्वा तत्र स्थाने किंचिन्मात्रं धनमानयावः।" धर्मबुद्धिरब्रवीत्—"भद्र, एवं क्रियताम्।"

अथ द्वावपि गत्वा तत्स्थानं यावत् खनतः, तावद्रिक्तं भाण्डं दृष्टवन्तौ। अत्रान्तरे पापबुद्धिः शिरस्ताडयन् प्रोवाच भो धर्मबुद्धे, त्वया हृतमेतद्धनं, नान्येन। यतो भूयोऽपि गर्तपूरणं कृतम्। तत्प्रयच्छ मे तस्यार्धम्। अथवाऽहं राजकुले निवेदयिष्यामि।" स आह—"भो दुरात्मन्, मैवं वद, किं धर्मबुद्धिरहमेतत् कर्म करोमि॥

एवं द्वावपि तौ विवदमानौ धर्माधिकरणं गतौ। प्रोचतुश्च परस्परं दूषयन्तौ। अथ धर्माधिकरणाधिष्ठितपुरुषैः दिव्यार्थं यावन्नियोजितौ तावत्पापबुद्धिराह—"अहो, न सम्यग्दृष्टोऽयं न्यायः। उक्तं च—

विवादेऽन्विष्यते पत्रं तदभावेऽपि साक्षिणः ।
साक्ष्यभावात्ततो दिव्यं प्रवदन्ति मनीषिणः ॥

तदत्र विषये मम वृक्षदेवताः साक्षीभूताः तिष्ठन्ति । ता अप्यावयोरेकतरं चौरं साधुं वा करिष्यन्ति ।" अथ तैः सर्वैरभिहितम्—"भोः, युक्तमुक्तं भवता । उक्तं च,

अन्त्यजोऽपि यदा साक्षी विवादे संप्रजायते ।
न तत्र विद्यते दिव्यं किं पुनर्यत्र देवताः ॥

तदस्माकमप्यत्र विषये महत्कौतूहलं वर्तते । प्रत्यूषसमये युवाभ्यामप्यस्माभिः सह तत्र वनोद्देशे गन्तव्यम्" इति ॥

एतस्मिन्नन्तरे पापबुद्धिः स्वगृहं गत्वा स्वजनकमुवाच—"तात, प्रभूतोऽयं मयाऽर्थो धर्मबुद्धेश्चोरितः । स च तव वचनेन परिणतिं गच्छति । अन्यथा अस्माकं प्राणैः सह यास्यति ।" स आह—"वत्स, द्रुतं वद, येन प्रोच्य तद्द्रव्यं स्थिरतां नयामि ।" पापबुद्धिराह—"तात, अस्ति तत्प्रदेशे महाशमी । तस्यां महत् कोटरमस्ति । तत्र त्वं सांप्रतमेव प्रविश । ततः प्रभाते यदा अहं सत्यश्रावणं करोमि, तदा त्वया वाच्यं यद्धर्मबुद्धिश्चोर इति" ।

तथाऽनुष्ठिते, प्रत्यूषे स्नात्वा पापबुद्धिर्धर्मबुद्धिपुरःसरो धर्माधिकरणकैः सह तां शमीमभ्येत्य तारस्वरेण प्रोवाच—"भगवति, वनदेवते, आवयोर्मध्ये यश्चोरस्तं

कथय।" अथ पापबुद्धिपिता शमीकोटरस्थः प्रोवाच—भोः शृणुत । धर्मबुद्धिना हृतमेतद्धनम्" ॥

तदाकर्ण्य सर्वेऽपि ते राजपुरुषाः विस्मयोत्फुल्ललोचनाः यावद्धर्मबुद्धेर्वित्तहरणोचितं निग्रहं शास्त्रदृष्ट्या अवलोकयन्ति तावद्धर्मबुद्धिना तच्छमीकोटरं वह्निभोज्यद्रव्यैः परिवेष्ट्य वह्निना संदीपितम् । अथ ज्वलति तस्मिन् शमीकोटरे अर्धदग्धशरीरः स्फुटितेक्षणः करुणं परिदेवयन् पापबुद्धिपिता निश्चक्राम । ततश्च तैः सर्वैः—"भोः, किमिदम्" इत्युक्ते, स पापबुद्धिविचेष्टितं सर्वमिदं निवेद्योपरतः । अथ ते राजपुरुषाः पापबुद्धिं शमीशाखायां प्रतिलम्ब्य धर्मबुद्धिं प्रशशंसुः ॥

उपायं चिन्तयेत् प्राज्ञस्तथाऽपायं च चिन्तयेत् ।
पुत्रेण व्यर्थपाण्डित्यात् पिता धूमेन घातितः ॥

पाठः XXV

॥ टिट्टिभसमुद्रयोः ॥

कस्मिंश्चित् समुद्रतीरैकदेशे टिट्टिभदम्पती प्रतिवसतः स्म । ततो गच्छति काले टिट्टिभी गर्भमाधत्त । अथ आसन्नप्रसवा सती सा टिट्टिभमूचे—"भोः, कान्त, मम प्रसवसमयो वर्तते । तद्विचिन्त्यतां किमपि निरुपद्रवं स्थानं, येन

तत्राहमण्डकविमोक्षणं करोमि ।" टिट्टिभः प्राह—"भद्रे, रम्योऽयं समुद्रप्रदेशः । तदत्रैव प्रसवः कार्यः ।" सा आह—"अत्र पूर्णिमादिने समुद्रवेला चलति । सा मत्तगजेन्द्रानपि समाकर्षति । तद्दूरमन्यत्र किंचित् स्थानमन्विष्यताम् ।" तच्छ्रुत्वा विहस्य टिट्टिभः प्राह—"भद्रे, का मात्रा समुद्रस्य या मम दूषयिष्यति प्रसूतिम् । तस्मात् विस्रब्धा अत्रैव गर्भं मुञ्च ।"

एतच्छ्रुत्वा समुद्रश्चिन्तयामास—"अहो गर्वः पक्षि-कीटस्यास्य । अथवा साध्विदमुच्यते—

"उत्क्षिप्य टिट्टिभः पादावास्ते भंगभयाद्दिवः ।
स्वचित्तकल्पितो गर्वः कस्य नात्रापि विद्यते ॥

तन्मयास्य प्रमाणं कुतूहलादपि द्रष्टव्यम् । किं ममै-षोऽण्डापहारे कृते करिष्यति ।" इति चिन्तयित्वा स्थितः ॥

अथ प्रसवानन्तरं प्राणयात्रार्थं गतायाः टिट्टिभ्याः समुद्रो वेलाव्याजेनाण्डान्यपाहरत् । अथागता सा टिट्टिभी प्रसवस्थानं शून्यमवलोक्य प्रलपन्ती टिट्टिभमूचे—"भोः, मूर्ख, कथितमासीन्मया ते यत्समुद्रवेलया अण्डानां विनाशो भविष्यति । तद्दूरतरं व्रजावः इति । परं मूढतया अहं-कारमाश्रित्य मम वचनं न कृतवान् । अथवा साध्विद-मुच्यते—

अनागतविधाता च प्रत्युत्पन्नमतिस्तथा ।
द्वावेतौ सुखमेधेते यद्भविष्यो विनश्यति ॥"

तच्छ्रुत्वा टिट्टिभ आह—"भद्रे, किं मां यद्भविष्यं संभावयसि । तत्पश्य मे बुद्धिप्रभावम् । यावदेनं दुष्टसमुद्रं स्वचञ्च्वा शोषयामि ॥" टिट्टिभ्याह—"अहो, कस्ते समुद्रेण सह विग्रहः । तन्न युक्तमस्योपरि कोपं कर्तुम् । उक्तं च—

अविदित्वात्मनः शक्तिं परस्य च समुत्सुकः ।
गच्छन्नभिमुखो नाशं याति वह्नौ पतङ्गवत् ॥"

टिट्टिभ आह—"प्रिये, मामैवं वद । येषामुत्साहशक्तिः भवति ते स्वल्पा अपि गुरून् विक्रमन्ते । तदनया चञ्च्वा अस्य सकलं तोयं शुष्कस्थलतां नयामि ॥"

टिट्टिभ्याह—"भोःकान्त, यत्र जाह्नवी नवनदीशतानि गृहीत्वा नित्यमेव प्रविशति, तथा सिन्धुश्च, तत्कथं त्वम् अष्टादशनदनदीशतैः पूर्यमाणं तं विप्रुषवाहिन्या चञ्च्वा शोषयिष्यसि । तत्किमश्रद्धेयेनोक्तेन ।" टिट्टिभ आह—"प्रिये,

अनिर्वेदः श्रियो मूलं चञ्चुर्मे लोहसन्निभा ।
अहोरात्राणि दीर्घाणि समुद्रः किं न शुष्यति ॥"

टिट्टिभ्याह—"यदि त्वया अवश्यं समुद्रेण सह विग्रहानुष्ठान कार्यं, तदन्यानपि विहंगमानाहूय सुहृज्जनसहितः एवं समाचर । उक्तं च,

"बहूनामप्यसाराणां समवायो हि दुर्जयः।
तृणैरावेष्ट्यते रज्जुः येन नागोऽपि बध्यते ॥"

टिट्टिभ आह—"भद्रे, एवं भवतु। सुहृद्वर्गसमुदायेन समुद्रं शोषयिष्यामि।"

इति निश्चित्य, बकसारसमयूरादीन् समाहूय स प्रोवाच—"भोः, पराभूतोऽहं समुद्रेणाण्डकापहारेण। तच्चिन्त्यतामस्य शोषणोपायः।" ते संमन्त्र्य प्रोचुः—"अशक्ता वयं समुद्रशोषणे। तदस्माकं स्वामी वैनतेयोऽस्ति। तस्मै सर्वमेतत् परिभवस्थानं निवेद्यते। येन स्वजातिपरिभवकुपितो वैरानृण्यं गच्छति॥"

अथ तथैव ते सर्वेऽपि पक्षिणो विषण्णवदना बाष्पपूरितदृशो वैनतेयसकाशमासाद्य करुणस्वरेण फूत्कर्तुमारब्धाः। "अहो, अब्रह्मण्यमब्रह्मण्यम्! अधुना सदाचारस्य टिट्टिभस्य भवति नाथे सति, समुद्रेणाण्डान्यपहृतानि। तत्प्रनष्टमधुना पक्षिकुलम्। अन्येऽपि स्वेच्छया समुद्रेण व्यापादयिष्यन्ते। उक्तं च—

एकस्य कर्म संवीक्ष्य करोत्यन्योऽपि गर्हितम्।
गतानुगतिको लोको न लोकः पारमार्थिकः॥"

अथैवं गरुडः समाकर्ण्य तद्दुःखदुःखितः कोपाविष्टश्च व्यचिन्तयत्—"अहो, अहो, सत्यमुक्तमेतैः पक्षिभिः। तदद्य गत्वा तं समुद्रं शोषयामः।" एवं चिन्तयतस्तस्य विष्णुदूतः

समागत्याह—"भो गरुत्मन्, भगवता नारायणेनाहं तव पार्श्वे प्रेषितः । देवकार्याय भगवानमरावतीं यास्यतीति । तत्सत्वरमागम्यताम् ।" तच्छ्रुत्वा गरुडः साभिमानं प्राह, "भो दूत, किं मया कुभृत्येन भगवान् करिष्यति । तद्गत्वा तं वद, यदन्यो भृत्यो वाहनायास्मत्स्थाने क्रियताम् । मदीयो नमस्कारो वाच्यो भगवतः ।" "दूत आह—भो, वैनतेय, कदाचिदपि भगवन्तं प्रति त्वया नैवाभिहितमीदृक् । तत्कथय किं ते भगवता अपमानस्थानं कृतम् ।" गरुड आह, "भगवदाश्रयभूतेन समुद्रेणास्मट्टिट्टिभाण्डान्यपहृतानि । तद्यदि तस्य निग्रहं न करोति नाहं भगवतो भृत्यः इत्येष मे निश्चयः । तद्गततरं गत्वा भवता भगवतः समीपे वक्तव्यम् ।"

अथ दूतमुखेन प्रणयकुपितं वैनतेयं विज्ञाय भगवांश्चिन्तयामास—"अहो, स्थाने कोपो वैनतेयस्य । तत्स्वयमेव गत्वा संमानपुरःसरं तमानयामि ।" इत्येवं संप्रधार्य रुक्मपुरे वैनतेयसकाशं सत्वरमगमत् । वैनतेयोऽपि गृहागतं भगवन्तमवलोक्य त्रपाधोमुखः प्रणम्योवाच—"भगवन्, त्वदाश्रयोन्मत्तेन समुद्रेण मम भृत्यस्याण्डान्यपहृत्य ममापमानं विहितम् । परं भगवल्लज्जया मया विलम्बितम्, नो चेदेनमहं स्थलतामद्यैव नयामि ।"

तच्छ्रुत्वा भगवानाह—"भो वैनतेय, सत्यमभिहितं भवता । तदागच्छ, येनाण्डानि समुद्रादादाय टिट्टिभं संभावयावः । अमरावतीं च गच्छावः ।'

तथानुष्ठिते, समुद्रो भगवता निर्भर्त्स्य आग्नेयं शरं सन्धाय अभिहितः—"भोः दुरात्मन्, दीयन्तां टिट्टिभाण्डानि । नो चेत् स्थलतां त्वां नयामि ।"

ततः समुद्रेण सभयेन टिट्टिभाण्डानि तानि दत्तानि । टिट्टिभेनापि भार्यायै समर्पितानि ॥

शत्रोः सारमवज्ञाय वैरमारभते हि यः ।
स पराभवमाप्नोति समुद्रष्टिट्टिभाद्यथा ॥

पाठः XXVI

श्रीमद्रामायणे अयोध्याकाण्डे

अष्टादशः सर्गः ॥

॥ कैकेय्यन्तःपुरे रामागमनम् ॥

स ददर्शासने रामो निषण्णं पितरं शुभे ।
कैकेयीसहितं दीनं मुखेन परिशुष्यता ॥ १ ॥
स पितुश्चरणौ पूर्वमभिवाद्य विनीतवत् ।
ततो ववन्दे चरणौ कैकेय्याः सुसमाहितः ॥ २ ॥
रामेत्युक्त्वा च वचनं वाष्पपर्याकुलेक्षणः ।
शशाक नृपतिर्दीनो नेक्षितुं नाभिभाषितुम् ॥ ३ ॥

तदपूर्वं नरपतेर्दृष्ट्वा रूपं भयावहम्।
रामोऽपि भयमापन्नः पदा स्पृष्ट्वेव पन्नगम्॥ ४॥

इन्द्रियैरप्रहृष्टैस्तं शोकसन्तापकर्शितम्।
निश्वसन्तं महाराजं व्यथिताकुलचेतसम्॥ ५॥

ऊर्मिमालिनमक्षोभ्यं क्षुभ्यन्तमिव सागरम्।
उपप्लुतमिवादित्यमुक्तानृतमृषिं यथा॥ ६॥

अचिन्त्यकल्पं हि पितुस्तं शोकमुपधारयन्।
बभूव संरब्धतरः समुद्र इव पर्वणि॥ ७॥

चिन्तयामास च तदा रामः पितृहिते रतः।
किंस्विदद्यैव नृपतिर्न मां प्रत्यभिनन्दति॥ ८॥

अन्यदा मां पिता दृष्ट्वा कुपितोऽपि प्रसीदति।
तस्य मामद्य संप्रेक्ष्य किमायासः प्रवर्तते॥ ९॥

स दीन इव शोकार्तो विषण्णवदनद्युतिः।
कैकेयीमभिवाद्यैव रामो वचनमब्रवीत्॥ १०॥

कच्चिन्मया नापराद्धमज्ञानाद्येन मे पिता।
कुपितस्तन्ममाचक्ष्व त्वं चैवैनं प्रसादय॥ ११॥

अप्रसन्नमनाः किं नु सदा मां प्रति वत्सलः।
विवर्णवदनो दीनो न हि मामभिभाषते॥ १२॥

शारीरो मानसो वापि कच्चिदेनं न बाधते।
संतापो वाभितापो वा दुर्लभं हि सदा सुखम्॥ १३॥

कच्चिन्न किंचिद्भरते कुमारे प्रियदर्शने।
शत्रुघ्ने वा महासत्वे मातृणां वा ममाशुभम्॥ १४॥

तथानुष्ठिते, समुद्रो भगवता निर्भर्त्स्य आग्नेयं शरं सन्धाय अभिहितः—"भोः दुरात्मन्, दीयन्तां टिट्टिभाण्डानि । नो चेत् स्थलतां त्वां नयामि ।"

ततः समुद्रेण सभयेन टिट्टिभाण्डानि तानि दत्तानि । टिट्टिभेनापि भार्यायै समर्पितानि ॥

शत्रोः सारमवज्ञाय वैरमारभते हि यः ।
स पराभवमाप्नोति समुद्रष्टिट्टिभाद्यथा ॥

पाठः XXVI

श्रीमद्रामायणे अयोध्याकाण्डे

अष्टादशः सर्गः ॥

॥ कैकेय्यन्तःपुरे रामागमनम् ॥

स ददर्शासने रामो निषण्णं पितरं शुभे ।
कैकेयीसहितं दीनं मुखेन परिशुष्यता ॥ १ ॥
स पितुश्चरणौ पूर्वमभिवाद्य विनीतवत् ।
ततो ववन्दे चरणौ कैकेय्याः सुसमाहितः ॥ २ ॥
रामेत्युक्त्वा च वचनं वाष्पपर्याकुलेक्षणः ।
शशाक नृपतिर्दीनो नेक्षितुं नाभिभाषितुम् ॥ ३ ॥

तदपूर्वं नरपतेर्दृष्ट्वा रूपं भयावहम् ।
रामोऽपि भयमापन्नः पदा स्पृष्ट्वेव पन्नगम् ॥ ४ ॥

इन्द्रियैरप्रहृष्टैस्तं शोकसन्तापकर्शितम् ।
निश्वसन्तं महाराजं व्यथिताकुलचेतसम् ॥ ५ ॥

ऊर्मिमालिनमक्षोभ्यं क्षुभ्यन्तमिव सागरम् ।
उपप्लुतमिवादित्यमुक्तानृतमृषिं यथा ॥ ६ ॥

अचिन्त्यकल्पं हि पितुस्तं शोकमुपधारयन् ।
बभूव संरब्धतरः समुद्र इव पर्वणि ॥ ७ ॥

चिन्तयामास च तदा रामः पितृहिते रतः ।
किंस्विदद्यैव नृपतिर्न मां प्रत्यभिनन्दति ॥ ८ ॥

अन्यदा मां पिता दृष्ट्वा कुपितोऽपि प्रसीदति ।
तस्य मामद्य संप्रेक्ष्य किमायासः प्रवर्तते ॥ ९ ॥

स दीन इव शोकार्तो विषण्णवदनद्युतिः ।
कैकेयीमभिवाद्यैव रामो वचनमब्रवीत् ॥ १० ॥

कच्चिन्मया नापराद्धमज्ञानाद्येन मे पिता ।
कुपितस्तन्ममाचक्ष्व त्वं चैवैनं प्रसादय ॥ ११ ॥

अप्रसन्नमनाः किं नु सदा मां प्रति वत्सलः ।
विवर्णवदनो दीनो न हि मामभिभाषते ॥ १२ ॥

शारीरो मानसो वापि कच्चिदेनं न बाधते ।
संतापो वाभितापो वा दुर्लभं हि सदा सुखम् ॥ १३ ॥

कच्चिन्न किंचिद्भरते कुमारे प्रियदर्शने ।
शत्रुघ्ने वा महासत्वे मातॄणां वा ममाशुभम् ॥ १४ ॥

अतोषयन्महाराजमकुर्वन्वा पितुर्वचः ।
मुहूर्तमपि नेच्छेयं जीवितुं कुपिते नृपे ॥ १५ ॥

यतो मूलं नरः पश्येत्प्रादुर्भावमिहात्मनः ।
कथं तस्मिन्न वर्तेत प्रत्यक्षे सति दैवते ॥ १६ ॥

कच्चित्ते परुषं किंचिदभिमानात्पिता मम ।
उक्तो भवत्या कोपेन यत्रास्य लुलितं मनः ॥ १७ ॥

एतदाचक्ष्व मे देवि तत्वेन परिपृच्छतः ।
किं निमित्तमपूर्वोऽयं विकारो मनुजाधिपे ॥ १८ ॥

एवमुक्ता तु कैकेयी राघवेण महात्मना ।
उवाचेदं सुनिर्लज्जा धृष्टमात्महितं वचः ॥ १९ ॥

न राजा कुपितो राम व्यसनं नास्य किंचन ।
किंचिन्मनोगतं त्वस्य त्वद्भयान्नाभिभाषते ॥ २० ॥

प्रियं त्वामप्रियं वक्तुं वाणी नास्योपवर्तते ।
तदवश्यं त्वया कार्यं यदनेनाश्रुतं मम ॥ २१ ॥

एष मह्यं वरं दत्वा पुरा मामभिपूज्य च ।
स पश्चात्तप्यते राजा यथान्यः प्राकृतस्तथा ॥ २२ ॥

अतिसृज्य ददानीति वरं मम विशांपतिः ।
स निरर्थं गतजले सेतुं बन्धितुमिच्छति ॥ २३ ॥

धर्ममूलमिदं राम विदितं च सतामपि ।
तत्सत्यं न त्यजेद्राजा कुपितस्त्वत्कृते यथा ॥ २४ ॥

यदि तद्वक्ष्यते राजा शुभं वा यदि वा शुभम् ।
करिष्यसि ततस्सर्वमाख्यास्यामि पुनस्त्वहम् ॥ २५ ॥

यदि त्वभिहितं राज्ञा त्वयि तन्न विपत्स्यते ।
ततोऽहमभिधास्यामि न ह्येष त्वयि वक्ष्यति ॥ २६ ॥

एतत्तु वचनं श्रुत्वा कैकेय्या समुदाहृतम् ।
उवाच व्यथितो रामस्तां देवीं नृपसन्निधौ ॥ २७ ॥

अहो धिङ्नार्हसे देवि वक्तुं मामीदृशं वचः ।
अहं हि वचनाद्राज्ञः पतेयमपि पावके ॥ २८ ॥

भक्षयेयं विषं तीक्ष्णं मज्जेयमपि चार्णवे ।
नियुक्तो गुरुणा पित्रा नृपेण च हितेन च ॥ २९ ॥

तद्ब्रूहि वचनं देवि राज्ञो यदभिकाङ्क्षितम् ।
करिष्ये प्रतिजाने च रामो द्विर्नाभिभाषते ॥ ३० ॥

तमार्जवसमायुक्तमनार्या सत्यवादिनम् ।
उवाच रामं कैकेयी वचनं भृशदारुणम् ॥ ३१ ॥

पुरा देवासुरे युद्धे पित्रा ते मम राघव ।
रक्षितेन वरौ दत्तौ सशल्येन महारणे ॥ ३२ ॥

तत्र मे याचितो राजा भरतस्याभिषेचनम् ।
गमनं दण्डकारण्ये तव चाद्यैव राघव ॥ ३३ ॥

यदि सत्यप्रतिज्ञं त्वं पितरं कर्तुमिच्छसि ।
आत्मानं च नरश्रेष्ठ मम वाक्यमिदं शृणु ॥ ३४ ॥

सन्निदेशे पितुस्तिष्ठ यथानेन प्रतिश्रुतम् ।
त्वयारण्यं प्रवेष्टव्यं नव वर्षाणि पञ्च च ॥ ३५ ॥

भरतस्त्वभिषिच्येत यदेतदभिषेचनम् ।
त्वदर्थे विहितं राज्ञा तेन सर्वेण राघव ॥ ३६ ॥

सप्त सप्त च वर्षाणि दण्डकारण्यमाश्रितः ।
अभिषेकमिमं त्यक्त्वा जटाजिनधरो वस ॥ ३७ ॥

भरतः कोसलपुरे प्रशास्तु वसुधामिमाम् ।
नानारत्नसमाकीर्णां सवाजिरथकुञ्जराम् ॥ ३८ ॥

एतेन त्वां नरेन्द्रोऽयं कारुण्येन समाप्लुतः ।
शोकसंक्लिष्टवदनः न शक्नोति निरीक्षितुम् ॥ ३९ ॥

एतत्कुरु नरेन्द्रस्य वचनं रघुनन्दन ।
सत्येन महता राम तारयस्व नरेश्वरम् ॥ ४० ॥

इतीव तस्यां परुषं वदन्त्यां
न चैव रामः प्रविवेश शोकम् ।
प्रविव्यथे चापि महानुभावो
राजा तु पुत्रव्यसनाभितप्तः ॥ ४१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
अयोद्ध्याकाण्डे अष्टादशः सर्गः ॥

पाठः XXVII

॥ शारदा गीतम् ॥

विद्यानाथे चतुर्मुखजाये,
कणितविपञ्चीके, वरदे, शारदे ॥

ज्योत्स्नाधवले, निर्मले वाणि,
कलय सुदीप्रां मे धिषणाम् , शारदे ॥

सुरगणवन्दितचरणसरोजे,
वितर गिरं मह्यं मधुराम् , शारदे ॥

गानलोले सुस्मितवदने,
कलमृदुलालापे, रसिके, शारदे ॥

नादब्रह्मसर्वस्वमूर्ते,
कुरु मयि करुणामयि सरले, शारदे ॥

॥ निगमनम् ॥

उद्धारश्छेदनं शाणोत्तेजनं पट्टशातनम् ।
तोलनं योजनं चेति रत्नसन्दर्भयोः समम् ॥

मुखं भूषयते रत्नं सुबद्धं कर्णसङ्गतम् ।
उदारवस्तुसन्दर्भः पावयत्यपि जीवनम् ॥

अविच्छिन्नप्रवाहोढा बालाः पाठावलीमिम ।
साधयन्तु धृतोत्साहाः काले काले कुले कुले ॥

विज्ञानं नीतिमतिं व्यवहृतिपटुतां मनःसमुल्लासम् ।
कुरुते पठतां पाठावलिर्महालिङ्गसंग्रथिता ॥

इति श्रीमदप्पय्यदीक्षितेन्द्रवंशवारिधिकलानिधीनां, महा-
महोपाध्यायश्रीत्यागराजमखिराजानां प्रपौत्रस्य,
महामहोपाध्यायश्रीयज्ञेश्वरसूरिसूनोः,
श्रीमहालिङ्गशास्त्रिनामधेयस्य
मार्गसहायशर्मणः कृतिषु
प्रवेशपाठावलिः
संपूर्णा ॥

शुभमस्तु ॥

Index of Verses *from the* Pancha Tantra

		Rs. A
8(a)	Translation into English of Part III of the above with exhaustive conjugations	0 8
9.	किंकिणीमाला—A first series of collections of Songs, lyrics, translations from English Literature and lyrical short poems—50 pieces in all ...	2 0
10.	कौण्डिन्यप्रहसनम्—A comic play with English notes	
11.	शम्भुचर्योपदेशः— An adaptation into Sanskrit Verse in abridged form of "A with Sambhu" of Venkataramani	
12.	द्रविडार्यासुभाषि tion of	

(Copies can be had of:)

Y. MAHALINGA SASTRI, M. A., B. L.,
TIRUVALANGADU,
(Via) Narasinganpet (S. I. Ry.)
TANJORE Dt.